# sadAshivendrastutiH

# સદાશિવેન્દ્રસ્તુતિઃ

## Document Information

Text title : sadAshivendrastutiH

File name : sadAshivendrastutiH.itx

Category : deities_misc, nRisiMhabhAratIsvAmi

Location : doc_deities_misc

Author : nRisiMhabhAratIsvAmibhirvirachitA

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 1, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 211

Latest update : January 19, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 18, 2025

*sanskritdocuments.org*

# સદાશિવેન્દ્રસ્તુતિઃ

શ્રીગણેશાય નમઃ ।
પરતત્ત્વલીનમનસે પ્રણમદ્ભવબન્ધમોચનાયાશુ ।
પ્રકટિતપરતત્ત્વાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥ ૧॥

પરમશિવેન્દ્રકરામ્બુજસમ્ભૂતાય પ્રણમ્રવરદાય ।
પદધૂતપઙ્કજાય પ્રણતિં૦॥ ૨॥

વિજનનદીકુઞ્જગૃહે મઞ્જુલપુલિનૈકમઞ્જુતરતલ્પે ।
શયનં કુર્વાણાય પ્રણતિં- ॥ ૩॥

કામાહિદ્વિજપતયે શમદમમુખદિવ્યરત્નવારિધયે ।
શમનાય મોહવિતતેઃ પ્રણતિં૦॥ ૪॥

નમદાત્મબોધદાત્રે રમતે પરમાત્મતત્ત્વસૌધાગ્રે ।
સમબુદ્ધયેઽશ્મહેમ્નોઃ પ્રણતિં૦॥ ૫॥

ગિલિતાવિદ્યાહાલાહલહતપુર્યષ્ટકાય બોધેન ।
મોહાન્ધકારરવયે પ્રણતિં૦॥ ૬॥

શમમુખષટ્કમુમુક્ષાવિવેકવૈરાગ્યદાનનિરતાય ।
તરસા નતજનતતયે પ્રણતિં૦॥ ૭॥

સિદ્ધાન્તકલ્પવલ્લીમુખકૃતિકર્ત્રે કપાલિભક્તિકૃતે ।
કરતલમુક્તિફલાય પ્રણતિં૦॥ ૮॥

તૃણપઙ્કુલિપ્તવપુષે તૃણતોઽપ્યધરં જગદ્વિલોકયતે ।
વનમધ્યવિહરણાય પ્રણતિં૦॥ ૯॥

નિગૃહીતહૃદયહરયે પ્રગૃહીતાત્મસ્વરૂપરત્નાય ।
પ્રણતાબ્ધિપૂર્ણશશિને પ્રણતિં૦॥ ૧૦॥

અજ્ઞાનતિમિરરવયે પ્રજ્ઞાનામ્ભોધિપૂર્ણચન્દ્રાય ।

પ્રણતાઘવિપિનશુચયે પ્રણતિં૦ ॥ ૧૧ ॥

મતિમલમોચનદક્ષપ્રત્યગ્બ્રહ્મૈક્યદાનનિરતાય ।
સ્મૃતિમાત્રતુષ્ટમનસે પ્રણતિં૦ ॥ ૧૨ ॥

નિજગુરુપરમ શિવેન્દ્રશ્લાઘિતવિજ્ઞાનકાષ્ઠાય ।
નિજતત્ત્વનિશ્ચલહૃદે પ્રણતિં૦ ॥ ૧૩ ॥

પ્રવિલાપ્ય જગદશેષં પરિશિષ્ટખણ્ડવસ્તુનિરતાય ।
આસ્યપ્રાસાન્નભુજે પ્રણર્તિ૦ ॥ ૧૪ ॥

ઉપધાનીકૃતબાહુઃ પરિરબ્ધવિરક્તિરામો યઃ ।
વસનીકૃતખાયાસ્મૈ પ્રણતિં૦ ॥ ૧૫ ॥

સકલાગમાન્તસારપ્રકટનદક્ષાય નમ્રપક્ષાય ।
સચ્ચિત્સુખરૂપાય પ્રણતિમ્ ॥ ૩૬ ॥

દ્રાક્ષાશિક્ષણચતુરવ્યાહારાય પ્રભૂતકરુણાય ।
વીક્ષાપાવિતજગતે પ્રણતિં૦ ॥ ૧૭ ॥

યોઽનુત્પન્નવિકારો બાહૌ મ્લેચ્છેન છિન્નપતિતેઽપિ ।
અવિદિતમમતાયાસ્મૈ પ્રણતિં૦ ॥ ૧૮ ॥

ન્યપતન્સુમાનિ મૂર્ધનિ યેનોચ્ચરિતેષુ નામસૂગ્રસ્ય ।
તસ્મૈ સિદ્ધવરાય પ્રણતિં૦ ॥ ૧૯ ॥

યઃ પાપિનોઽપિ લોકાન્ તરસા પ્રકરોતિ પુણ્યનિષ્ઠાગ્ર્યાન્ ।
કરુણામ્બુરાશયેઽસ્મૈ પ્રણતિં૦ ॥ ૨૦ ॥

સિદ્ધેશ્વરાય બુદ્ધેઃ શુદ્ધિપ્રદપાદપદ્મનમનાય ।
બદ્ધા પ્રમોચકાય પ્રણતિં૦ ॥ ૨૧ ॥

હૃદ્યાય લોકવિતતેઃ પદ્યાવલિદાય જન્મમૂકેભ્યઃ ।
પ્રણતેભ્યઃ પદયુગલે પ્રણતિં૦ ॥ ૨૨ ॥

જિહ્વોપસ્થરતાનપ્યાહ્નોચ્ચારેણ જાતુ નૈજસ્ય ।
કુર્વાણાય વિરક્તાન્પ્રણતિં૦ ॥ ૨૩ ॥

કમનીયકવનકર્ત્રે શમનીયભયાપહારચતુરાય ।
તપનીયસદૃશવપુષે પ્રણતિં૦ ॥ ૨૪ ॥

તારકવિદ્યાદાત્રે તારકપતિગર્વવારકાસ્યાય ।
તારજપપ્રવણાય પ્રણતિં૦ ॥ ૨૫ ॥

મૂકોઽપિ યત્કૃપા ચેલ્લોકોત્તરકીર્તિરાશુ જાયેત ।
અદ્ભુતચરિતાયાસ્મૈ પ્રણતિં૦ ॥ ૨૬ ॥

દુર્જનદૂરાયતરાં સજ્જનસુલભાય હસ્તપાત્રાય ।
તરુતલકેતિનાય ગ્રણતિં૦ ॥ ૨૭ ॥

ભવસિન્ધુધારયિત્રે ભવભક્તાય પ્રણમ્રવશ્યાય ।
ભવબન્ધવિરહિતાય પ્રણતિં૦ ॥ ૨૮ ॥

ત્રિવિધસ્યાપિ ત્યાગં વપુષઃ કર્તું સ્થલત્રયે ય ઇવ ।
અકરોત્સમાધિમસ્મૈ પ્રણતિં૦ ॥ ૨૯ ॥

કામિનમપિ જિતહૃદયં ક્રૂરં શાન્તં જડં સુધિયમ્ ।
કુરુતે યત્કરુણાઽસ્મૈ પ્રણતિં૦ ॥ ૩૦ ॥

વેદસ્મૃતિસ્થવિદ્વલ્લક્ષણલક્ષ્યેષુ સન્દિહાનાનામ્ ।
નિશ્ચયકૃતે વિહર્ત્રે પ્રણતિં૦ ॥ ૩૧ ॥

બાલારુણનિભવપુષે લીલાનિર્ધૂતકામગર્વાય ।
લોલાય ચિતિપરસ્યાં પ્રણતિ૦ ॥ ૩૨ ॥

શરણીકૃતાબ સુગુણૈણીકૃતરક્તપઙ્કજાતાય ।
ધરણીસદૃક્ક્ષમાય પ્રણતિ૦ ॥ ૩૩ ॥

પ્રણતાય યતિવરેણ્યૈર્ગણનાથેનાપ્યસાધ્યવિઘ્નહૃતે ।
ગુણદાસીકૃતજગતે પ્રણતિ૦ ॥ ૩૪ ॥

સહમાનાય સહસ્રાણ્યપ્યપરાધાન્પ્રણમ્રજનરચિતાન્ ।
સહસૈવ મોક્ષદાત્રે પ્રણતિં૦ ॥ ૩૫ ॥

ધૃતદેહાય નતાવલિતૂણપ્રજ્ઞાપ્રદાનવાઞ્છાતઃ ।
શ્રદિક્ષિણવક્ત્રાય પ્રણતિં કુર્મઃ સદાશિવેન્દ્રાય ॥ ૩૬ ॥

તાપત્રયાર્તહૃદયસ્તાપત્રયહારદક્ષનમનમહમ્ ।
ગુરુવરબોધિતમહિમન્ શરણં યાસ્યે તવાઙ્ઘ્રિકમલયુગમ્ ॥ ૩૭ ॥

સદાઽઽત્મનિ વિલીનહૃત્સકલવેદશાસ્ત્રાર્થવિત્
    સરિત્તટવિહારકૃત્ સકલલોકહૃતાપહૃત્ ।

સદાશિવપદામ્બુજપ્રણતલોકલભ્ય ગ્રભો
    સદાશિવયતીટ્ સદા મયિ કૃપામપારાં કુરુ ॥ ૩૮॥

પુરા યવનકર્તનસ્રવદમન્દરક્તોઽપિ યઃ
    પુનઃ પદસરોરુહપ્રણતમેનમેનોવિધિમ્ ।
કૃપાપરવશઃ પદં પતનવર્જિતં પ્રાપ યત્-
    સદાશિવયતીટ્ સ મય્યનવધિં કૃપાં સિઞ્ચતુ ॥ ૩૯॥

હૃષીકહૃતચેતસિ પ્રહૃતદેહકે રોગકૈ-
    રનેકવૃજિનાલયે શમદમાદિદિગન્ધોજ્ઝિતે ।
તવાઙ્ઘ્રિપતિતે યતૌ યતિપતે મહાયોગિરાટ્
    સદાશિવ કૃપાં મયિ પ્રકુરુ હેતુશૂન્યાં દ્રુતમ્ ॥ ૪૦॥

ન ચાહમતિચાતુરીરચિતશબ્દસઙ્ઘૈઃ સ્તુતિં
    વિધાતુમપિ ચ ક્ષમો ન ચ જપાદિકેઽપ્યસ્તિ મે ।
બલં બલવતાં વર પ્રકુરુ હેતુશૂન્યાં વિભો
    સદાશિવ કૃપાં મયિ પ્રવર યોગિનાં સત્વરમ્ ॥ ૪૧॥

શબ્દાર્થવિજ્ઞાનયુતા હિ લોકે વસન્તિ લોકા બહવઃ પ્રકામમ્ ।
નિષ્ઠાયુતા ન શ્રુતદૃષ્ટપૂર્વા વિના ભવન્તં યતિરાજ નૂનમ્ ॥ ૪૨॥

સ્તોકાર્ચનપ્રીતહૃદમ્બુજાય પાદાબ્જચૂડાપરરૂપધર્ત્રે ।
શોકાપહર્ત્રે તરસા નતાનાં પાકાય પુણ્યસ્ય નમો યતીશ ॥ ૪૩॥

નાહં હૃષીકાણિ વિજેતુમીશો નાહં સપર્યાભજનાદિ કર્તુમ્ ।
નિસર્ગયા ત્વં દયયૈવ પાહિ સદાશિવેમં કરુણાપયોધે ॥ ૪૪॥

કૃતયાઽનયાનતાવલિકોટિગતેનાતિમન્દબોધેન ।
મુદમેહિ નિત્યતૃપ્તપ્રવર સ્તુત્યા સદાશિવાયાશુ ॥ ૪૫॥

ઇતિ શ્રીજગદ્ગુરુશૃઙ્ગગિરિશ્રીસચ્ચિદાનન્દશિવાભિનવ-
નૃસિંહભારતીસ્વામિભિર્વિરચિતા સદાશિવમહેન્દ્રસ્તુતિઃ સમાપ્તા ॥

Proofread by PSA Easwaran

*sadAshivendrastutiH*

pdf was typeset on October 18, 2025

Please send corrections to *sanskrit@cheerful.com*